रेनिमंक्तुमाकांक्षति॥विचारोवितर्कः॥विभावाविप्रतिपत्तिसंशयसाधकबाधकादयः।अनुभा
वाःशिरःकपभ्रूचालनादयः।प्रत्येकमुदाहरणानि॥कालिंदीविलुठत्कठोरकमठक्रूरंधनुःशांभ
वंरामोबालमृणालकोमलतनुर्वंशोवतंसोभुवः।व्याहारप्रखलाःखलाःक्षितिभृतांगोष्ठीगरी
ष्ठापुनस्तस्मात्केवलमेवतिष्ठतिममश्रेयस्करोभास्करः॥सौंदर्यस्यमनोभवेनगणनालेखाकि
मेषाप्तता।लावण्यस्यविलोकितुंत्रिजगतामेषासमुद्भाविका।आनंदद्रुममंजरीनयनयोःकिंवास
गार मुज्जृंतेराधायाःकिमुतःस्वभावसुभगारोमालिरुन्मीलति॥कथयकथयकेयंखंजनंखेलयं
तीविरहतियमुनायाःपाथसिस्वर्णवल्ली॥अयमुदयतिकोवाशारदःशीतभानुस्तदुपरि
तिराणामेकोवावितः॥इयंनविसत्सुधाकरकराधिकाराधिका।करंकिरणमालिनःकि
मुसहेतस्यावपुः॥नवाकनकमंजरीवहतिखंजरीटंयतःततःस्मरमदालसाकथयकेयमुन्मी
लति॥[illegible]ननुदशावस्थासुअभिलाषगुणकथाप्रलापाव्यभिचारिभावान्यंतरेणनगणि
तास्तत्किंस्वतंत्राएवेतिचेन्न।औत्सुक्येभिलाषस्यवर्णनात्मकःस्मृतौगुणकथायाउन्मादेचप्र
लापस्यांत[illegible]र्भावात्।अत्रप्रतिभाति।छलमधिकोव्यभिचारीभावइति।तांबूलानयनछ

लेनरसस्तोषेपिसंविधिनः॥ इतिशृंगारेइंद्रजालादयः॥ हास्येचव्यपदेश्यव्यपदेश्यादयः॥ इति दर्पणानुवादे वीथिनेदेनगणनाच्च। संगुप्तक्रियासंपादनछलविलावा॥ अवमानाप्रतिषेधादयः॥ अनुभावावक्रोक्तिनिहतास्तनिहतवीक्षणप्रहसितप्रच्छादनादयः॥ यथाशृंगारे। संकेतीकृतकाननंप्रविश्यतोरन्योन्यंकोतूहलोदन्यत्वप्रतिज्ञानिनमाधवरयतोरन्योन्यहृत्वस्यतोः॥ कुंचत्कायमितस्ततःकिसलयैरात्मानमाहृएवतोराधामाधवयोर्निकुंजनवनादुद्भूविकापातुनः॥ संग्रामेयथा॥ सज्जापिच्छेलाक्कपटंबुरुबूर्नूपुरोपकंठेपुनरीक्षमाणः॥ हृष्योकपीद्रस्यमुखेसखेलमायोजयामासरामचेष्टः॥ सर्वेषिव्यभिचारस्थानानिविस्तरभियानोपदर्शितानि। आलस्योग्रजुगुप्सासंत्रासौवर्ज्याः॥ आलस्यग्लानिनिर्वेदश्रमशंकानिद्रौत्सुक्यापस्मारसुप्तिबोधोन्मादजाड्यास्रुव्यभिचारिणः॥ हास्येऽवहित्थालस्यनिद्रौत्सुक्यप्रबोधान्यसूयाव्यभिचारिणः॥ करुणेमोहनिर्वेददैन्यजाड्यविषादश्रमापस्मारोन्मादव्याध्यालस्यस्मृतिवेपथुस्तंभस्वरभेदकंपाव्यभिचारिणः॥ वीरेउत्साहधृतिमतिगर्वावेगामर्षोग्रतारोमांचाव्यभिचारिणः॥ भयानकेस्तंभस्वेदगद्गदतारोमांचवैवएवशंकामोहावेगदैन्यचपलत्रासापस्मारप्रलयमूर्छाव्यभिचारिणः॥ बीभत्सेअपस्मारमतिव्याधिमोहावेगवैवर्ण्यानिव्यभिचारिणः॥ अद्भुतेस्तंभरोमांचस्वेदगद्गदताविमताव्यभिचारिणः॥ अन्येचव्यभिचारिणोवारसानुकूलाऊहनीयाः॥

स्थायिनोपिव्यभिचरंति॥ हासःशृंगारेतिर्यक्स्थकरुणाद्भुतेषुक्रोधोवीरेऽन्येषोकः॥ शृंगारयोः॥ जुगुप्साभयानकेउत्साहविस्मयोसर्वरसेषुव्यभिचारिणः॥ उत्साहोरौद्रहास्ययोरिति॥ ७॥ इति श्रीभानुदत्तविरचितायांरसतरंगिण्यांव्यभिचारिनिरूपणंनामपंचमस्तरंगः॥ श्री॥ ७॥

अथरसानिरूप्यंते॥ विभावानुभावसात्विकव्यभिचारिभावैरुपनीयमानःपरिपूर्णस्थायिभावो रस्यमानोरसः॥ भावानुभावव्यभिचारिभावैर्मनोविश्रामोयत्रक्रीयतेसवारसः॥ प्रबुद्धस्थायिभावावासनावारसः॥ प्रबोधकारणाभावविभावानुभावसात्विकव्यभिचारिभावाः॥ नयूनोःप्रथमानुरागेऽव्याप्तिःपूर्वानुभावाभावादितिवाच्य॥ तत्रापिजन्मांतरीयसत्वादिति॥ रसोद्विविधः॥ लौकिकोलौकिकश्च॥ लौकिकसंन्निकर्षजन्मालौकिकः॥ अलौकिकसन्निकर्षजन्माऽलौकिकः॥ लौकिकसंन्निकर्षःषोढाविषयगतः॥ अलौकिकसंन्निकर्षोज्ञानं॥ तेषुचानुच्छेतेषुज्ञानमेवैतज्जन्माननुच्छेतेषपिंतेनैवतेषुप्राक्तनसंस्कारद्वारेणप्रत्यासत्तिः॥ अलौकिकरसस्त्रिविधा॥ स्वाभिकःमानोरथिकऔपनायिश्चेति॥ औपनायिकश्चकाव्यपदपदार्थचमत्कारेणाद्यैचपरंतुद्वयोरप्यानंदरूपता॥ ननुमानोरथिकोरसोनप्रसिद्धइतिचेत्सत्यं॥ अस्माकंतुमनोरथोपरचितप्रासादवापितटक्रीडाकाननवेश्मिकौतुकजुषांमायुःपरिक्षीयते॥ इत्यादौमानोरथिकशृंगारश्रवणत्॥ नास्तेसुखस्यत्रैविध्यगणनाच्चरसेनचविनासुखा

रस० नुपपत्तेरितितत्रविशेषः। [illegible] तत्रनरतः। शृंगारहास्यकरुणरौद्रवीरभयानकाः। बी
भित्साद्भुतसंज्ञाचेत्यष्टौनाट्यरसाःस्मृताः। सकलाधिदैवतंविदुः। शृंगा रस्यदैवतं। तेन स च
सकलाध्यतयासकलाकांक्षाविषयत्वेनवाप्रथमंशृंगारस्योपन्यासः। ननुवात्सल्य
लौल्यंनास्तिः कार्पण्यंवाकथंनरसः। आर्द्रतानिलाश्रद्धास्पृहानांस्थायिभावानांतत्रसत्वा
दितिचेन्नाव्यभिचारित्वात्मकत्वात्। धर्मिकल्पनातोधर्मकल्पनायालघुत्वाच्च। व्यभिचारि
रतिरेवास्तु। किंकरुणेनेतिचेन्नारतेःशोकरतिशोककारणतायारतेरुपलक्षणत्वात्।
किंचारतेःकस्यरसस्यव्यभिचारित्वं। नशृंगारहास्यरौद्रवीरकरुणयुवमिथुनपरस्पर
हास्यक्रोधानंदानांतत्रान्यावात्। बीभित्सस्यजुगुप्सायास्तत्रान्यावात्। नाद्भुतस्यतत्रविस्मयस्या
नियतत्वात्। तस्माच्छोकस्यस्थायितयास्थीशोकभावः। करुणएवोऽतिरिक्तरसइति। ननुरतिरेवा
स्तुकिंहास्येनेतिचेत्सकस्यास्तुव्यभिचारिकरुणरौद्रवीरभयानकानांतत्रानवकाशात्। नाद्भुतस्य
विस्मयस्यानियतत्वात्। नशृंगारस्यरतेःस्थायित्वापत्तेः। रसाःसमंजसास्यसांकर्यं। ननुरति
हास्ययोरसंकीर्णस्थानान्यावात्। कथंसंकुलः स्यादितिचेन्न। हेतोरसाधारण्यात्। असाधारण्यना
मात्रस्थायित्वं। यथारतेः [illegible] सांकर्येपिस्थायिशोकादसाधारण्यात्। करुणोनिष्पद्यतेतथातत्सांकर्यं

पिस्यादीहास्यभावादसाधारण्यात्। शृंगारोनिष्पद्यते। शृंगारेपिस्यादावपिन्नसाधारणहेत
वःआर्द्रतादयःसंतितेषामेरसापत्तिरितिवाच्यं। आर्द्रतादिनामपिरतित्वात्। तस्माच्चतत्रासाधारण्ये
शृंगाररसत्वापत्तिः। ननुउत्साहक्रोधावुन्नयत्रतस्माद्वीररौद्रयोरन्यतरएववर्तताइतिचेन्ना स्थायी
नेदंनचेदात्। उत्साहवासनावीरेनतुरौद्रेक्रोधवासनारौद्रेनतुवीरेतेनमनएवतत्रसर्वत्रसाक्षी॥
यूनोःपरिपूर्णःपरस्परंप्रमोदःसम्यक्संपूर्णस्तिन्नावोवाशृंगारः। यूनोरेकत्रप्रमोदस्यरतेर्वाधिक्ये
नूनतायांचतिरेकेवापरिपूर्तेरन्यावात्तरसान्नासहतिः। सचद्विविधः। संभोगविप्रलंभश्च। तत्रदर्श
नसंलापादितरेतरनुद्भूयमानंसुखंपरैरेरसंयोगउत्पद्यमान [illegible] आनंदोवासंभोगः। संयोगोब
हिरिंद्रियस्यसंबंधः। तस्यदैवतंविष्णुः। वर्णःश्यामः। यथा। स्तोत्रेनचाटुवचनानिपरहृतानिपाणिः प
योधरगतोऽडतोऽजगामालक्ष्याःपरंतुपृथुवेपथुरेवनीवींविस्रंसयन्मुहुरभन्मधुसूदनस्य॥१॥नि
द्राक्षणंमुन्मयवदनंकांतेकुचांतस्पृशीसस्तव्यस्तदुकूलदर्शितवलिप्रकटनानिश्रियः। एधायाद
दरघूर्णदुत्पलदलद्वयेणीमदंद्रोहि [illegible] निर्दयंकोणस्यतरंगितेविरचितोदीर्घायुरेवस्मरः॥२॥ देशनो
समयानाविषयतोनायिकानांनायकानांचनेदंनायिकानायकयोरवस्थानेदंनचबहवो
नेराः। तेचरसमंजसंयोदर्शिताःनेदविस्तरेणयाख्यिताः॥ अथहावानिरूप्यंते॥ थ। तत्रस्त
रतःस्त्रीलालसास्तोविछित्तिर्विभ्रमःकिलकिंचितंमोट्टायितंकुट्टमितंविब्बोकोललितंविहृतंचे

रस०

विशेषादरहावास्तुयोषितां॥ नारीणांशृंगारचेष्टाहावः॥ सचस्वभावजोनारीणां॥ ननुविब्बोक
विलासविच्छित्तिर्विभ्रमःपुरुषाणामपिसंभवंतीति चेत्सत्यं॥ तेचतेषामौपाधिकाः॥ स्वभावजानारीणामे
वानन्वेवंयदिचेत्तर्हिसदैवतेतासांकथंनभवंतीतिचेत्सत्यं॥ दीपकान्वयव्यतिरेकान्यांनायिका
नांहावाविभ्रांवतिरेभवंति॥ लीलाविलासविच्छित्तिललितानिस्त्रीणामेवोद्दीप्तविब्बोककुट्टमि तविहृतानिः॥ तत्रकिल॥ किंचिदुच्चयसंकीर्तनंप्रियस्मरणवचनाद्यनुहरनंलीला तत्रविभावाः॥ सखीषुकौतुककलापः॥ अनुभावः॥ प्रियपरिहासः॥ यथा॥ चंडांशोश्चरमाद्रिचुंबिनि मनोज्ञिताःसंतुसुरांन्यंचत्कौतुकयातयाविरचितेवंशीरवेरधयाएषःस्फूर्जतिकंस्यनिस्वन इतिक्रोधात्प्रजल्पाननंराधावीक्ष्यलताप्रतानपिहितोस्मेरोहरिःपातुनः॥ गमनवदनचुंबनय नादिनायःकश्चिदुत्पद्यतेविशेषःसविलासः॥ तत्रविभावाः॥ प्रियदर्शनस्मरणादयः॥ अनुभा वाःस्निग्धावलोकनसंकेतप्रीतिप्रकटनादयः॥ यथा॥ कज्जलंकाचिदरस्फुरद्धसिनदृष्ट्व

४ कांति× छित्वेक्षुदंडपुर्वलात्कुंडलेसाचिनक्षितगीवंलपंत्यागिरः॥ प्रातर्नर्तितपुंडरीकपरिषत्पांडित्य पादद्वयीदृष्टिर्यंप्रतिजायतेवरतनोर्वक्त्रस्यकाधिका॥ कतिपयभूषणचिन्यासोविच्छि त्तिः॥ तत्रविभावाः॥ सौकुमार्यंप्रियसौभाग्यसौंदर्यगर्वक्रोधत्रासप्रकाशादयः॥ अनुभावाः गर्वमानत्रासप्रकाशादयः॥ यथा॥ मंजीरंनपदेकरेनकटकंमौलौनमालापुनःकस्तूरीति

लकंतथापितनुतेसंसारसारश्रियं॥ सर्वाधिक्यमलेखिन्नालफलकेयद्वेधसासुंदरीयोजानीतःकि
मुतत्रमन्मथमहीपालेनमुद्राकृता॥ १॥ वागंगभूषणांस्थानविपर्यासोविभ्रमः॥ अत्रविभावाः॥
धनमदरागोत्कर्षादयः॥ अनुभावाःप्रियसख्याद्युपहासादयः॥ यथा॥ त्यक्तेकेलिविधौनिजांशु
कधियापीतांबरस्यांशुकंमायाःपरिधायसन्नशयनात्प्रातःप्रयांत्याबहिः॥ द्वारांतुर्वेनांचलं
चपलयन्क्रोधंदृशंदर्शयन्वाचाकौतुकमाचरन्स्मितसुधास्निग्धोहरिःपातुनः॥ अमानि
लाषश्चेर्ष्यागर्वस्मितहर्षनयक्रोधानांसंकरः किलकिंचितं॥ तत्रहर्षः॥ अमानिलाषश्रद्धानांस्मित
हर्षनयक्रुधां॥ असूयासंकरःप्राप्तेर्विशेषः किलकिंचितं॥ अत्रविभावाः॥ नवयौवनोद्भेदचपल्या
दयः॥ अनुभावाः कर्तव्यानिर्धारणादयः॥ यथा॥ [illegible] कोदंडमारोहतिचंडिमानंमधुव्रतः कं
क्षतिशैणिमानंपद्मेसुधांवांछतिवेपमानंस्वर्णाचलःखिद्यतिकिंनिदानं॥ क्रोधागरसमुत्थिताः
ताः×५ समुदयन्त्रासश्रमेलादिताः॥ व्रीडानिःपरिमार्ष्टिस्मितसुधांधारानिरुद्धर्तिताः॥ स्नाताःस्नेहरसेमनो
नवकलामालानिरावर्षिताःपायासुर्मयिनैलराजदुहितुःस्फीताकटाक्षछटाः॥ वार्तायैसु
ख्येसतिनिचृतचूयोदर्शनस्पृहामोट्टायितं॥ अत्रविभावाः॥ सपत्नीत्रासलोकत्रासलज्जादयः॥
अनुभावामनःप्रेमकथासंकेतचूनिरेक्षणादयः॥ यथा॥ नस्नेहस्यकथांसकथमपिश्रोतुंसमुत्कंठ
तेराधाकितु [illegible] विकीर्णरत्नकपटादागत्यसोधाबहिः॥ नृत्यन्नेत्रपुटीस्फुरत्कुचतरीस्वे

रस० दोषसदोस्तदीव्यावलान्नलुठी सवलत्पदिमुद्गुः ह्लोतिकेन्नाम्यति॥दुःखेसुखचेष्टाकृद्दमितं॰ अत्र
विन्नावाः एतोक्तभरतादयः॰ अनुन्नावाः॰ कपटकायसंकोचकप
टक्षीत्कारादयः॰ यथा॥रेडुपाणिः प्रचलतिचिरादंशुकीनिश्चलासोन्नविद्धेपोन्नतिकुटिलो व
नेत्रमंतःप्रसंन्नं॰गदाश्लेषोन्नवतिसुतनोरर्द्धमात्रोनकारुकंपोन्नर्द्धप्रसरतिमुखंसुन्मुखेन
प्रयांति॥गर्वोन्निमानसंन्नूतोविकारेविब्बोकः॰तत्रविन्नावायौवनमदधनमदकुलमद्प्रि
यापराधादयः॰ अनुन्नावा॰ अवहित्थदुर्वचनदुःप्रेक्षणादयः॰ यथा॰हृतांजलिःकातरदृष्टि
पातःप्राणेश्वरःपार्श्वमुपाजगाम॥सखीमुखेकुड्मलरुद्धमेवापुनःपुनःप्रेक्षितुमाचकांक्ष॥स
कलागसमीक्षितविन्यासोल्लसितःतत्रैवस्मितादयोंतर्भवंति॥तत्रविन्नावाः मनःप्रसाद
म प्रियतद्दृष्टानुरागधीरत्वादयः॰ अनुन्नावाः॰ प्रियवशीकरणलोकानुरागचमत्कारादयः
यथा॰कलङ्कणितमेखलंचपलचारुनेत्रांचलंप्रसन्नमुखमंडलंललितहोन्नमानाधरं॥
स्फुरत्पुलकबंधुरंश्रवणसंचलत्कुंडलंविहस्यरतिमंदिरंव्रजतिकस्यनातोदरी॥प्रियसंन्नि
धावन्निलाषापरिपूर्तिर्विहतं॰व्याजलज्जादयोविन्नावाः॰ अनुन्नावान्नान्यथाचेष्टाऽन्य
थाव्यवहारादयः॰यथाव्याजात॰ अन्निलषतिकपोलेचंद्रचूडविधातुंतिलकमुदयदंतःको
पन्नाजान्नवान्या॥फणिपतिन्नयकूटादंगमुत्कंपयंत्याप्रचलंवसनवातेर्वितः केलिदीपः॥

लज्जातोयथा॰ अनंदन्नाजोरधुनंदस्यैनेकगवरोधनकरेणकुर्युःसखीलपंतीमितिसं
जघानचकोरनेत्राचुलकोदकेन॥१॥यूनोरन्योन्यमुदितानांपंचेंद्रियाणांसंबंधान्नवे
दन्निष्ठाप्राप्तिर्वीविप्रलंन्नः॰नचमानात्मकेविप्रलंन्नेतिव्याप्तिः॰मुदितपंचेंद्रियसंबंधान्ना
वस्यविद्विष्टान्नाद्यास्यतत्रापिसत्वात्॰तदानींयूनोरिंद्रियाणांमुदितत्वान्नाघात॰ननुयाप्रि
यमन्निसर्तुंगछतिसापिवियुक्तान्नवेदितिचेत्सत्यं॰सापिवियुक्तैव॰ अचिरदर्शनप्रत्यासन्न
मोदेनविरुद्धधर्मस्याश्रुपातादेरसंन्नवइति॰सचविप्रलंन्नःपंचधा॰देशांतरगमनाद्गुरुनिदे
शादन्निलाषादीर्घातःशापाच्चेति॰समयाद्देवाद्विरहादित्याप्युन्नेयाः॰देशांतरगमनाद्यथा॥
प्रस्थानायतवतोद्यमप्रियतमेदोःकंकणेनच्युतंधैर्येणस्खलितमदेनगलितंनेत्रान्नसानि
मित्तंजीवेनापियियासतानिवनिवप्रारंनिवामल्लुवःकंपादोर्लतिकिंकिणीकलरवव्या
जेनवैत्यस्मरन्॰यथातातचरणानांवीणमंकेकथमपिसखीप्रार्थनान्निर्विधायखेरंखेरं
सरसिजदृशागातुमारब्धमेव॰तंत्रीबुध्याकिमपिविरुतीणदीनांगवल्लीमेनामेवसृगति
बकुलोद्यदेनाविन्नमेतत्॥गुरुनिदेशाद्यथा॰ आस्वानचूतंतरुंरुरुमनसिजक्लाप्येषनंगस्तमो
मरोगंधवहःसितोमलयजोदोषाकरोमाधवः॰ अंगारोनवपल्लवःपरन्तोविलोगु
रोरुद्यानिर्यातोसिविचारितःकथमपिक्रूरस्वयानग्रहः॰ अन्निलाषाद्यथा॰ प्राणा

रुचिसुखंमुखंरचयतोर्नकीलतग्रीवयोर्न्यस्तंचोलमजानतोःकचिदपिव्याजात्पुनरस्पृशतोः॥मार्गेविस्मरतोःकचित्कचिदिदंत्यक्ताक्षरंजल्पतोःसाचिप्रेक्षितभावयोर्यदनयन्मूक्यंतदाख्यास्महे॥ईर्षातोयथा।प्राणेभ्योस्यप्रवल्लभंमनःप्रेमदेमग्नंसुतंचेतश्चतेदृगविकमलंजीवनंबंधुजीवंवाआशास्तूत्रग्रथितमखिलंवेधसातस्यनंगेस्यादेतेषामपिनिपतनंचंडिमानंविमुंचन्समयाद्यथा।विश्लेषेजीवनव्रीडापीडाविप्लुतमानसाःतस्योत्प्रातःप्रियंप्रेक्ष्यचक्रीबक्रीडतानना॥दैवाद्यथा॥जीवितेसतिविश्लेषोविश्लेषेसतिजीवितंद्वयोरप्येतयोर्यूनोरहमेवनिदर्शनं॥विरहाद्यथा।केलिगृहेवामणिमंदिरेवाश्रयामलंकानगरंकुतान्यः॥इतस्ततःप्रस्थितयोर्नयूनोवियोगजन्माविरमानहिः॥इतीश्रीनानुदत्तविरचितायांरसतरंगिण्यांशृंगारनिरूपणंनामषष्ठस्तरंगः॥अथहासस्यपरिपोषोहास्यः।सचद्विविधःहसितंस्मितंच।स्वनिष्ठःपरनिष्ठश्चतावप्युत्तममध्यमाधमत्वेनत्रिधेतिषोढा।स्वनिष्ठोपिषड्विधःपरनिष्ठोपिषड्विधइतिद्वादशभेदोहास्यः।तथाहि।उत्तमानांस्वनिष्ठेपरनिष्ठेचहसितस्मितेमध्यमानांस्वनिष्ठेपरनिष्ठेचहसितोपहसितेअधमानांस्वनिष्ठेपरनिष्ठेअपहसितावहसितेउत्तमानांईषद्विकसितकपोलमव्यक्तदशनमपोगसुष्ठुक्षितंस्मितंपरनिष्ठंस्वनिष्ठंच॥विकसितकपोलमुत्फुल्लेक्षितदंतंहसितंस्वनिष्ठंपरनिष्ठंच।मध्यमानांसमयोचितउत्तमखनमानुंचितमुखमाविःभूतदशनरागंहसितस्वनिष्ठंपरनिष्ठंच।विकसितकपोलमुत्फुल्लाननमीषद्धसि

तदृतंमुपहसितंस्वनिष्ठंपरनिष्ठंच।अधमानामुत्फुल्लनासापुटंकुटिलदृष्टिवीक्षितंकुंचितग्रीवंस्फुटतरस्वनंअपहसितंस्वनिष्ठंपरनिष्ठंच।अत्युद्धतमुद्यदंकंपितमौलिस्फुटतरस्वनमपहसितंस्वनिष्ठंपरनिष्ठंच।अत्युद्धतमतिबलात्स्फुटतराश्रुमाक्षिप्तपार्श्वजनमारब्धकताल्मतिहसितंस्वनिष्ठंपरनिष्ठंचास्वनिष्ठस्मितंयथा।[illegible]लेखिनीमितदृतोविलोकयन्कुत्रकुत्रनजगामपद्मजः॥तांपुनःश्रवणसीमिसंस्थितांघाप्यसंनतमुखःस्मितंदधौ॥स्वनिष्ठहसितंयथा।रोमांकुरंव्योमगतेरदाग्रमुद्यद्युतिंस्तीयमुदीक्ष्यविस्मोःयदासदासंकिमुतत्वयोधेरद्यापिफेनस्तबकायमानं॥॥परनिष्ठेस्मितहसितेयथा।हरवृषनमुखे[illegible]सखेलमायोज्ञयतिसुवर्णसवर्णकांतिपक्ष्मःदृशिनुजगपतेःनिश्वसोडास्यःकलयतिकज्जलंतिकेन्द्रघान्याः॥परनिष्ठंविहसितंयथा।निशासुतैलस्यधियागृहीतैर्मञ्जीजलैर्लिप्तमुखारविंदंगोपंप्रातेस्वलदश्रुनीरमथीरनादंजहसुस्तरुण्यः॥उपहसितंपरनिष्ठंयथा।योनिरोधोमयारब्धइतिपद्यंपठन्बुधःअश्वदुत्पलनासेनत[illegible]टस्येनोपहस्यते॥अपहसितंपरनिष्ठंयथारतोत्सवेवल्लभयाप्रसूत्रंकंठावसक्तंपरिमोचयंतीदिजांगनादीर्घतरंहसंतीतारस्वरंवारवधूर्जहास॥अतिहसितंपरनिष्ठंयथा।चोरःकामरिपोर्गृहंनिशिगतश्चूलंकपालंवरुनवीजंधूर्तफलस्यतंदुलधियानीत्वापुनर्हेक्कवान्।व्यावल्गान्प्रचलन्स्वलत्परिपतन्मुह्यन्विघूर्णन्हसन्नघदघ्नि मौलिमुक्तकुसुमंस्वर्वेश्ययाहस्यते॥शोकस्यपरिपोषःकरुणः।

रस० आशाविच्छेदे स तिसर्वेंद्रियक्लमो वा न च विप्रलंभेति व्याप्तिः। तत्रेष्टाशायाः सत्वात्। तद्विच्छेदे सति स च वि तरंगि
प्रलंभः करुण एव। शोको दुःखं। वर्णोस्य कपोतविचित्रितः। दैवतं वरुणः। स च करुणः स्वनिष्ठः परनिष्ठ
श्चेति। स्वशापस्वबंधनस्वस्वनिष्ठैर्विभावैः स्वनिष्ठः। परेष्टनाशपरशापपरक्लेशादीनां दर्शनश्रवणस्म
रणविभावैः परनिष्ठः। स्वनिष्ठो यथा। तव नाथ शरः शरासनं तव देहेन सहैव भस्मसात्। अहमस्मि
ततः प्रतीयते तव नास्मीति किमुच्यतामितः॥ परनिष्ठो यथा। अनुवनमनुयांतं बाष्पवारित्य
जंतं मृदितकमलदामक्षामरामं विलोक्य। दिनमपि रविरोचिस्तापमंतः प्रसूते रजनिरपि च ध
त्ते तारकाबाष्पबिंदून्॥ परिपूर्णः क्रोधो रौद्रः। सर्वेंद्रियाणामौद्धत्यं वा। वर्णोस्य रक्तः दैवतं रुद्रः।
यथा। चंडांशुः किं न चक्रं भुजगपतिरसौ वर्तते किं न पाशः। कुंतादिग्दंतिदंतान्न च गिरिरशनिः किं
च शस्त्रैः किमन्यैः। भीमोहं दुष्टदुर्योधननिधनसमुद्दंडबाहुप्रकांडप्रत्यावृत्तिप्रकोपप्रलयहुत
वहो नास्मि कस्यापि वश्यः॥ यथा वा। क्रीडातुंगतुरंगटापटपेलीखवीकृतोर्विधरश्रेणिस्फू
र्जितधूलिधोरणितमस्तोमावलीढं जगत्। बद्धस्पर्द्धकरींद्रवृंदचरणव्याभुग्नभोगीश्वरव्यग्रो
दग्रफणाग्ररत्नरुचिभिर्विद्योतयामो वयं॥ परिपूर्ण उत्साहो वीरः सर्वेंद्रियहर्षो वा। वर्णोस्य गौरः।
दैवतं शक्रः। स च त्रिधा। युद्धवीर दानवीरो दयावीरश्चेति भेदात्। इयांस्तु विशेषः। स चोत्साहो यु
द्धवीरे प्रतापाध्यवसायादिप्रभवः। दानवीरे दानाध्यवसायप्रभवः। दयावीरे आद्रतादिप्रभवः।

अत एव पुत्रजन्मनि नातिव्याप्तिः। युद्धवीरो यथा। संग्रामांगणमागते दशमुखे सौमित्रिणा विस्मितं सुग्री
वेण विकंपितं हनुमता व्यालोलमालोकितं॥ श्रीरामेण परंतु पीनपुलकस्फूर्जत्कपोलश्रिया सांद्रस्ने
हरसालसानि दधिरे बाणासने दृष्टयः॥ दानवीरो यथा। अभ्यागच्छति मंदिरं द्विजकुले खंडाय खंडां
बुधिं क्षाराब्धिं लवणाय दुग्धजलधिं दुग्धाय चेद्दास्यति। दुर्वारो विरहो भवेदिति भयाद्दीनेव दिव्यापगा
यस्यांघ्रिं न जहाति विप्रवपुषे रामाय तस्मै नमः॥ दयावीरो यथा। दयाबीजं हरेर्नेत्रमंकुरस्तत्र भास्क
रः। ततः समुत्थितावेतौ पल्लवौ रामलक्ष्मणौ॥ भयस्य परिपोषः सर्वेंद्रियविक्षोभो वा भयानकः।
वर्णः श्यामः दैवतं यमः। स च स्वनिष्ठः परनिष्ठश्च। अपराधात्स्वनिष्ठो यथा। गोपीक्षीरघटीविलुंठन
विधिव्यापारवार्त्ताविदोः पित्रोस्ताडनशंकया शिशुवपुर्देवः प्रकाश्य ज्वरं। रोमांचं रचयन्दृशौ मु
कुलयन्प्रत्यंगमुत्कंपयन्सीत्कुर्वन्तमसि प्रसर्पति गृहं स्वीयं समागच्छति॥ परनिष्ठो यथा। गं
गायाः सलिले निमज्जति जटाजूटे परिभ्राम्यति भ्रश्यत्पक्षिहुताशने फणिफणाभोगे क्वचिल्लीयते।
कुज्जीभूय हरस्य कर्णकुहरं निर्गंतुमुत्कंठते राहोरास्यमुदीक्ष्य किं न कुरुते बालस्तुषारद्युतिः॥ वि
कृतनिदानात्परनिष्ठो यथा। कुर्वाणे दशभिर्मुखैर्दशमुखे नादं सुरैः कंपितं दिग्नागैश्चलितं रवेर
पि हयैरुत्पुच्छमाधावितं सुग्रीवस्तु समुच्छलज्जलनिधिव्यालोलवीचिभ्रमिभ्रश्यत्सेतुविशं

र्स० कयाहनुमतोवक्त्रेदृष्टोसंदधे।जुगुप्सायाःपरिपोषःसर्वेंद्रियाणांसंकोचोवाह्यनिरसः।वर्णोनी
लःदेवतंमहाकालः।सचस्वनिष्ठःपरनिष्ठश्च।स्वनिष्ठोयथा।कुंडलिनीकुत्कुरुलुमिथःप्रारब्धथूथू × काली २
त्कृतिन्यंचद्गीचिचलद्विहायसिचलच्छिरःश्रेणीनिपातस्फारिबद्धस्पर्द्धिविपक्षपक्षरुधिरस्रोतस्विनी
स्रोतसिन्नत्यत्युद्भ्रमतिस्खलत्यथरणत्कोकुलोन्मार्गवः॥परनिष्ठोयथा।स्वंकुंडीद्रवं कर्णेवि
रचयतनुतांचामरंवाजिपुच्छैर्मालामुंडैश्चंडैःसृजगजजघनेमंडपंयोजयस्व॥-अंत्रैर्निराजनायाःक
लयविधिमितिप्रेतवृंदंगनानामालापःकुंडलिन्यास्तनयपरिणयारंभजन्मावनद्ध॥विस्मयस्यस
म्यक्समृद्धिरद्भुतःवर्णोस्यपीतःदेवतंब्रह्मा।सचस्वनिष्ठःपरनिष्ठश्चतत्रस्वनिष्ठोयथा।लीलानिबद्धपाथो
धिर्हेलाहतदशाननंसरामःसीतयाश्लिष्टमात्मानंबहुमन्यते॥परनिष्ठोयथा।त्यक्ताजीर्णदुकूलवद्वसु
मतीबद्धोबुधिर्बिंदुवत्बाणाग्रेणजरत्पोतकइवव्यापादितोरावणःलंकाकापिविन्नीषणायसहसानु
द्रवद्भस्तोर्पिताश्चैवंरघुनंदनस्यचरितंकोवानरोमांचति॥७॥-अत्युक्तिर्नमोक्तिचित्रोक्तिविरोधाना
सप्रस्तुतयोन्नुतएवांतर्भवति।-अत्युक्तिर्यथा।-क्वयादेषसतांहितायभगवान्कोत्रावतारोहरिःसिंधोःके
× तारहा ३ नामपास्यसदशनप्रांतेस्थितायाभुवःवारिद्स्तिलकतिस्वर्वाहिनीमात्यतिक्रीडादर्पणतिक्षपापति
× रति ३ रहेर्दवश्चताटंकति॥दिव्यहरेर्मुखहरेविस्तीर्णेपर्णतिव्योम।चूर्णतिचंद्रःक्रमुकतिकनकगिरिःखदिरसा
रतिखरांशुः॥नमोक्तिर्यथा।तीव्रेस्निग्धरुचःकरैःपरिचितांसेकुंकपोलस्थलीनीराणांनि

करंकरेणहरतातुषीकृतेनीरधौ॥मैनाकंसमुदीक्ष्यपंकपतितंशालूरशंकाजुषोहेरंबस्यपुना
नुदंतःशिखरव्यापारलीलारसः॥यथावा।-अंतःक्रोधाग्निजागत्कपटनरहरिस्फारनिश्वास
मातव्याधूतानारिवाहाःकुलधरणिभृतःसातुषुप्रस्खलंतः॥दिग्भागैर्नागबुध्यावनहरि
एकुलैःएकयाग्रहलतांछायान्मात्याकिरतैःसितवसनधियावीक्षितास्वैर्धृतिभिः॥चि
त्रोक्तिर्यथा।गिरिर्वमतिमौक्तिकावलिमलिह्यंस्थावरंनरत्नधिर्दीप्तिव्यजनमारुतंवां
छति॥धनुःस्वपितिमान्नथंग्रथितबंधमंथंतमोनमोमनसिजायतेकिमपिकौतुकं
तन्वते॥लाक्षणिकमखिलंचित्रोक्तिरेव।विरोधाभासोयथा।कोप्यसौतवमुकुंदनंदकोनिं
दकोभवतिकंससंपदः॥कुंडलीत्वमसिकालियंकुतोदूरतोनयसितन्निवेदय॥नाद्येसर्वर
सानंदरूपाएव।प्रवृत्तिर्निवृत्तिश्च।निवृत्तोयथाशांतिरसस्तथाप्रवृत्तोमायारसइतिप्र
तिभाति।एकत्ररसोत्पत्तिरपरत्रनेतिबलुमनएकत्वात्।नचसंवृतिरेवकस्यास्तुव्यभि
चारी।नशृंगारस्यतद्धेरिणीबीजत्वस्थापितत्रसत्वात्।-अतएवनाद्भुतस्यनवीरस्यतद्धेरि
णीभयानकस्यापितत्रसत्वात्।-अतएवनभयानकस्यापिनाविशांतस्यतद्धेरिणीत्वात्।नचसामान्यएवरसःतद्धेरिणीबीजमस्तरेनवलितिति॥तर्हिशांतिरसस्यरसानावत्वाप
तेः।किंतुविद्युतइवरतिहासशोकक्रोधोत्साहजुगुप्साविस्मयास्तत्रतत्रोत्पद्य

रस०

तेलीयंते च। तेन तत्र व्यभिचारी भाव इति॥ लक्षणं। प्रबुद्धा मिथ्याज्ञानवासना माया रसः
मिथ्याज्ञानमस्य स्थायी भावः। विभावाः सांसारिकभोगार्जकधर्माधर्माः। अनुभावाः पुत्र
कलत्रसाम्राज्यादयः। यथा। वाटीलाटीदृगंभोरुहरभसकरी नायिका कापि कांता तल्पं
चंद्रानुकल्पं प्रकटयति रहः कामिनां कामनीतिं॥ रूपं कामानुरूपं मणिमयभुवनं बंधु
रं बंधुरंगो लोके लोकेशकस्य त्वमसि न भुवने सर्वदा सर्वदाता॥ नाद्यभिन्नस्थले नि
र्वेदस्थायी भावः। शांतोपि नवमो रस इति। निर्वेदस्य परिपोषः शांतः। दोषप्रशमो वा। दोषा
कामक्रोधलोभादयः। तत्र विषयदोषविचारविरक्त्यादयो विभावाः। अनुभावा आ
नंदाश्रुपुलकहर्षगद्गदवचनादयः। हेयं हर्म्यमिदं निकुंजभुवनं चेयं प्रदेयं धनं पेयं ती
र्थपयो हरेर्भगवतो गेयं पदांभोरुहं। नेयं जन्म चिराय दर्भशयने धर्मे निधेमनः स्थेयं तत्र
सितासितस्य सविधे ध्येयं पुराणं महः॥ यथा वा। वेदस्याध्ययनं कृतं परिचितं शास्त्रं पुराणं
श्रुतं सर्वं व्यर्थमिदं पदं न कमलाकांतस्य चेत्कीर्तितं॥ उत्खातं सदृशीकृतं विरचितः सेकों
भसा भूयसा सर्वं व्यनिःफलमालवालवलये क्षिप्तं न बीजं यदि॥ इति श्रीभानुदत्तविर
चितायां रसतरंगिण्यां रसनिरूपणं नाम सप्तमस्तरंगः॥ ७॥ स्थायी भावजा दृष्टिरष्टधा।
स्निग्धा हृष्टा दीना क्रुद्धा दृप्ता भीता जुगुप्सिता विस्मिता चेति। व्यभिचारी भावजा दृष्टिर्वि
शतिधा। शून्या मलिना शांता लज्जिता शंकिता मुकुलिता ऽर्द्धमुकुलिता ग्लाना जिह्मा कुं

वैरिरस्यैसे भावो विभावो व्यभिचारी भावोपि रसहानिकर इति तद्वारयेत्। तत्र प्राचीनसंमतिर
पि। न च वैरसंब्रूयाद्वैरिणां नापि भावकं। न विभावं च संचारी भावं नैव कदाचन॥ किंचांगागि
भावापन्नयोरेकदा एकदेशे सति न वैरं। कपिसंयोगतदभावयोरिव। समयभेदे सत्यपि न वै
रं। भूतले घटस्तदभावयोरिव॥ वैरं यथा। प्रियेणालिंग्यमानायाः प्रियायाः कुचकुंभयोः
करजक्षतनिर्मुक्तं रुधिरं कुंकुमायते॥ देशविरोधे सति विरोधाभावो यथा॥ एकः सिंधु
भुवः करे विलुलितश्चक्रे द्वितीयः स्थितः कामध्वंसिनि कालकूटकवलक्लिष्टे तृतीयः कृतः।
भूयः क्षीरनिधेर्घनप्रमथने पाणिस्तुरीयस्ततो व्यासक्तः कमलापतेर्भगवतो नानारसा
ः पांतु वः॥ अत्र शृंगाररौद्रकरुणाद्भुतरसानां विरोधाभावः। समयभेदेन यथा। भग्नं
कामरिपोर्धनुः परिहृतं राज्यं स्थितं कानने निर्भिन्नस्त्रिशिराः खरस्य पिशितं स्पृष्टं
कपिर्लालितः। लंकेशो दलितश्चिराय रुदितं लंकावधूनां श्रुतं नीता सद्म विदेहभूस्त
दखिलं रामस्य लोकोत्तरं॥ अत्राद्भुतभयानकरौद्रबीभत्सहास्यवीकेरुणशृं
गाररसानां विरोधाभावः। अंगागिभावापन्नानां रसानामेकत्र समावेशो यत्र स चर

रस० सशबलइतिवेदितव्यः।तस्याप्येतदेवोदाहरणं।अंगयोर्वैरेपिनरसहानिः।भटयोर्वैरप्र
भोरिव।यथा।सीतांसंस्मर्यवीचिप्रचलकुवलयस्पर्द्धिचक्षुःक्षिपंतींसेनांसंवीक्ष्यरक्षः
शरदलितवपुःशोणितासारसिक्तां॥रामोपिक्रोधदृष्ट्यादशमुखनिपतन्मुंडलाभप्रमोद
क्रीडाकालीकरालभ्रुकुटिसहचरींसंदधेचापयष्टिं॥।अत्रशृंगारबीभत्सयोर्वैरेपि
नरसहानिः।एमंगांगीभावापन्नयोरविरोधिनोरेकत्रभोनेपिनरसहानिः।यथा।भौ
×कंवा६ जंगमंगिरिमयंजलदात्मकंशस्त्रंयदेवमुमुचेदशकंधरेण॥सर्वंविदेहतनयाविरहातु
रेणरामेणवह्निमयमस्त्रमिवव्यलोकि॥ननुशृंगाबीभत्सयोःसहजवैरंकुतः।मधु
निपीयनिष्ठीवतोःसंभोदगेर्शनादितिचेत्सत्यं।बीभत्सस्यजुगुप्सास्थायीभावः।सा
चतद्दर्शनेनतटस्थस्यभवतिनतुतयोरागौत्कट्यादिति।ननुतथापिसतिबीभ
त्सेशृंगारोदृश्यते।तथाहि।यदपिहृदिविशालामुंडमालानपाणिस्त्यजतिन
रकपालंरौरवंचर्मचैलं।तदपिगिरिसुतायाःपक्षपातःपुरोसमुदयतिविचित्रःका
मिनोप्रेमबंधः॥इत्यादावितिचेत्सत्यं।निजभर्तुरधमेपिभूषणेभक्त्यतिशयेन

पत्न्यास्तदपिजुगुप्सानैवभवति।जुगुप्सितत्वेनप्रतीयमानंजुगुप्सोत्पादकंभवति।किं
चप्रियसंबंधौचाधिकतरंप्रेमतत्रोत्पद्यते।तेनस्थायीभावाभावाबीभत्सस्तत्रनभव
ति।तेनुवीरस्ययुधिगच्छतःसर्पस्पर्शनेचकिततारौद्रेचाकस्मिकोत्पातातिपातेवि
स्मयइतिचेत्सत्यं।चकितताविस्मयश्चतत्रतत्ररसादेशान्नभवत्येव।सतिवावि
षयभेदः।वीरेनप्रतिभटाभ्दयंकिंतुभुजंगाद्रौद्रेनप्रतिबलबलाधिक्यात्विकृत्या
ताद्विस्मयइति।रसवैरस्योत्पादकमखिलमवध्येयं।तत्रपूर्वाचार्याः।अन्यच्चरस
वैरस्योत्पादकंवचनंतथा।नवाच्यंरसभावज्ञैनाद्यशास्त्रविशारदैः॥वचनमित्यु
पलक्षणं।एवंभावविभावानुभावेद्रष्टव्यं।यथा।क्वाहंक्वत्वंक्वमधुसमयःकुत्रवा
दूतिकासौमेघच्छायाप्रविचलमिदंकुत्रवाप्रेमयूनोः॥आयुर्वायुप्रचलबिशिनी
पमानं३ वारिविदूमानंमुग्धेविसृजसकलंतुच्छमेवप्रतीमः॥अत्रनिर्वेदप्रतिपादकमखि
लंशृंगारविरोधि।अनौचित्यंसर्वथावध्येयं।तत्रप्राचीनग्रंथकारकृतः।अनौ
चित्यादृतेनान्यद्रसभंगस्यकारणं।प्रसिद्धौचित्यवद्वस्तुरसहर्षायजायते॥

अनुद्वेगकरमनौचित्यं लोकयात्राप्रसिद्धमौत्यं वा यस्माद्यूनोर्यत्र मिथो रतिस्तत्रै
व रसः। एकस्य रतिश्चेत्स रसाभास एव। क्रमेणोदाहरणे। यथा। सीतासमागमश्ला
घाबंधुरं दशकधरं। प्रहर्तुं क्षमते कामो रामो वा निशितैः शरैः॥ यथा। किमिति वे
लितग्रीवं मुग्धे मुहुर्मुरीक्षसे। निधुवनवप्रांतेयांतं चन्नलेयनांचलैः॥ विफल
मखिलं यूनोर्नो चेदुदेति परस्परं रतिरथ मनोजन्मा देवः स एव निषेव्यतां॥ अ
त्र नायिकाया एव रतिर्न तु नायकस्य। एवमेकस्यानेकविषया रतिराभास एव। ए
कस्याप्यनेकविषया रतिराभास एव। परं त्वेष विशेषः। यस्य व्यवस्थिता बह्वो
नायिकास्तत्र न सारेभासः। तथा सति कृष्णस्यापि सकलोत्तमनायकस्य बहु
कामिनीविषयाया एव रतेराभासतापत्तिः। दक्षिणनायकस्याप्याभासतापत्तिः।
तस्मादव्यवस्थितबहुकामिनीविषयकवैशिकनायकपरमेतत्। अत एव
वैशिकानां वैश्यानां च रसाभास इति प्राचीनमतं। एकस्या अनेकविषया र
तिर्यथा। पंचेषुक्षितिपप्रतापलहरीप्रीतिस्तदीया पुनः कासां नः स्तनकांच

२× एकस्या एव रतिश्चेत्सोपि रसाभास एव। ×२
३× अरावणस्य रतिर्न तु सीतायाः ×३

नाचलतटे काश्मीरपंकायते। कासां मूर्द्धनि नैव नीरजदृशां सिंदूरलेखायते कासां
वा न च कर्णयोः प्रियसखे माणिक्यभूषायते॥ यत्र रसा बहवः स च रसशबलः
यत्र भावा बहवः स च भावशबलः रसशबलो दर्शित एव भावशबलो यथा।
प्रव्रज्यैव शुभाय मे श्रुतिमुखं जायेत तस्या वचश्चक्राग्रे मम कस्मरस्त्रीज
गतीशून्या विना राधया॥ निर्मुक्तैव मनस्त्रपा मृगदृशो लावण्यमन्यादृशं धिक्
जन्म क्व गतासि किं विलपितैः क्वासि प्रसन्ना भव॥ निर्वेदौत्सुक्यामर्षभ्रमविषा
ददैन्यानां भावानां सांकर्यादेष भावशबल इति॥ अथ रसालंकारभावाना
मभिव्यक्तिः। स च त्रिविधः। अभिमुखो विमुखपरमुखश्चेति। भावविभावा
नुभावैर्यस्याभिव्यक्तिः स चाभिमुखः। भावविभावानुभावानामनुक्तत्वा
त्कृष्णावगमो विमुखः। परमुखो द्विविधः। अलंकारमुखो भावमुखश्च॥

रसतरंगिणी॥ अलंकारोमुख्योमनोविश्रामहेतुत्वाद्रसोगौणः। नावमुखोनावोमुख्यानो विश्रामहेतुत्वाद्रसोगौणः। अत्रप्राचीनसंमतिरपि। अलंकारेचरुचिरे मनोविश्रामकारिणि। अलंकारस्यमुख्यत्वंगौणत्वंरसनाव योः॥ अग्निमुखनाःस्वस्वप्रकारेणोक्ता एव। विमुखोयथा। मैथिलीलक्ष्मणोरामः सुग्रीवःपवनात्मजाः। लंकापुरंपरित्यज्यपारंवारांबुधेर्ययौ॥ संकटमखिलसुखतीर्थसमागतादिति। अद्भुतोरसःकस्मादवगम्यते॥ अलंकारमुखोयथा। एषानरेषाक्रमतामल्लीनां। नातिप्रनातेनचकैरविण्याः। आलिंगितातिंतुषारनोनोः कांतिःकलंकस्यवपुर्विलग्ना॥ अत्रापह्नुतेरलंकारस्यमुख्यता। नावमुखोयथा। सखीनोनिधिनीरक्षीरपटलालंकारिणी मेदिनीदातुविप्रकुलायथोजितवतःसंकल्पवाक्योद्यमे॥ नानीनीरक्

रसतरं हात्सरोरुहमुतेत्कालताविःक्षतेहस्तोनोरुहिनार्गवस्यकिमपिन्नी डास्मितंपातुवः॥ अत्रतिनावस्यमुख्यतादानवीरस्यगौणता॥ विद्वद्भारिधरास्नेहंतथावर्षतुसंततं॥ लक्ष्मतेविपुलांवृद्धिंयथारस तरंगिणी॥ यावन्मदानोःकृताकापिकालिंदीमुविवर्तते॥ तावत्तिष्ठतु मेनानोरेषारसतरंगिणी॥ इतिश्री। कविकुलसनाथश्रीगणनाथ तनयमैथिलश्रीभानुदत्तविरचितारसतरंगिणीसमाप्ता॥ ॥ ॥

इतिश्रीरसतरंगिणीचिंतामणिभट्टसुतयज्ञे
ज्ञेश्वरेणलिखितास्वपठनार्थंपरार्थंच